परम, उत्तम, अत्यंत; 'l. night' गतायां रात्रौ; 'the l. year' गत-अतीत-संवत्सरः, पश्चत् *ind.*; 'l. but one' उपांत्य, उपांतिक; 'l.-born' अवरज; 'at l.' अंते, अंततः; 'l. part' शेषभागः; 'l. part of the night' उत्तररात्रः, चरमयामः; 'l. half' उत्तरार्धः, पश्चार्धः, परार्धः, 'the year before l.' परारि *ind.*; 'to the l.' शेषं यावत्. -*adv.* अंते, शेषे, अंततः, अवरं, चरमं, अवरतः. -*v. i.* अव-स्था 1 A, स्था 1 P; oft. by अवधिः in comp.; 'l. ing for many days' चिरस्थायिन्, एष ते जीवितावधिः प्रवादः (U. 1) 'will l. through life'; 'this will l. as food for four months' एतेन (अस्माकं) मासचतुष्टयस्य भोजनं भविष्यति; 'the bloom of youth l.s for a few days' कतिपयदिवसस्थायिनी यौवनश्रीः (Bh. II. 2). -ing, *a.* स्थायिन्, चिर-दीर्घ-कालस्थायिन्; अनपायिन्, नित्य, स्थिर, ध्रुव, अक्षय, शाश्वत (ती *f.*), अजर, चिरंतन (नी *f.*). -ly, *adv.* अंते, अंततः, चरमतः, शेषे, अवरतः.

**Latch,** *s.* अर्गला-लं, विष्कंभः, अर्गलाबंधः, तालकं, द्वारबंधनी; 'the postern door was on the l.' अर्गलानिरुद्धं पक्षद्वारं.

**Latchet,** *s.* पादुकाबंधनी.

**Late,** *a.* विलंबेन आगत or प्राप्त; कालातीत, वेलातीत, समयातीत, अतिक्रांतकाल, अतिकाल, अतीतकाल-समय. 2 अवसित, परिणत, अवसन्न. 3 नूतन, अचिर, प्रत्यग्र, अभिनव, आधुनिक (की *f.*), नातिपुराण, सद्यस्कालीन. 4 अतीत, गत, व्यतीत, भूत; प्राक्तन-पूर्वतन (नी *f.*), पौर्विक (की *f.*), 'at a l. hour of the day' परिणते दिवसे, अवसन्नप्राये अहनि; 'at a l. hour of the night' क्षीणभूयिष्ठायां क्षपायां; 'at a l. period of life' परिणते वयसि. -*adv.* विलंबेन, विलंबात्, वेलातिक्रमेण, अतिकालं-समयं, चिरेण, चिरात्, चिरकालेन-लात्; 'to be l.' वेलातिक्रमं कृ 8 U, चिर(रा)यति (D.); 'why are you l.' किमिति चिरायित त्वया; 'l. in life' परिणतवयसि, *See* above; 'too l. in the day' अतिपराह्णे; 'too l. in the evening' अतिसायं. 2 अकाले, असमये. -ly, 'of late,' *adv.* इदानींतने काले, नातिचिरात्प्राक्, आधुनिकसमये; अचिरं. -ness, *s.* कालातीतता, कालातिक्रमः; परिणामः, परिणति *f.* -Later, *a.* उत्तर, अपर, पर, उत्तरकालीन, पाश्चात्य. -*adv.* (on) उत्तरं, उत्तरोत्तरं, पश्चात्, उत्तर-पर-काले.

**Latent,** *a.* नि-,लीन, गूढ, छन्न, गुप्त, अदृष्ट, अप्रत्यक्ष, अप्रकाश, अप्रकट, अदृश्य, अंतर्हित, निभृत; 'a l. disease' धातुस्थः-शरीरांतर्गतः-रोगः.

**Lateral,** *a.* पार्श्वीय, पार्श्वस्थ, पार्श्विक (की *f.*). -ly, *adv.* पार्श्वभागे, पार्श्वतः, पार्श्वे.

**Lath,** *s.* सूक्ष्मकाष्ठं-दारु, तनुफलकः-कं.

**Lathe,** *s.* कुंदः-दं, भ्रमः-मि *f.*, चक्रं.

**Lather,** *s.* अंजनफेनः, मार्जनतैलफेनः.

**Latifolious,** *a.* पृथु-विशाल-पर्ण.

**Latitude,** *s.* अक्षः. 2 (Celestial) निक्षेपः. 3 विस्तारः, विस्तृति *f.*, प्रथिमन् *m.*, आयति *f.* 4 अनियंत्रणं, स्वातंत्र्यं, नियमोपेक्षा, नियमातिक्रमः, शैथिल्यं; 'degree of l.' अक्षांशः; 'l. of a planet' पतनं; 'parallel of l.' अक्षांशवृत्तं. -Latitudinarian, *a.* शिथिल, अनियंत्रण, निर्यंत्रण. -*s.* मतस्वातंत्र्यावलंबिन् *m.*, निर्बंधहीनः. -ism, *s.* मतशैथिल्यं, विचारस्वातंत्र्यं, अनियंत्रणं.

**Latten,** *s.* रीति *f.*, पित्तलं.

**Latter,** *a.* उत्तर, अपर, पर, अवर, अन्य, (*pron. a.*); पश्चिम, चरम, अंतिम; उत्तरोक्त, अवरोक्त; 'former and l.' पूर्वापरं; 'in the l. part of the day' पराह्णे. -ly, *adv.* अर्वाक्काले, अधुनातनकाले; *See* **Lately.**

**Lattice,** *s.* जालमार्गः, गवाक्षः, जालं, गवाक्षजालं, वातायनं; 'l.-work' जालकर्मन् *n.*

**Laud,** *v. t.* प्रशंस् 1 P, श्लाघ् 1 A, स्तु 2 U, कृत् 10, गुणं वर्ण् 10. -*s.* प्रशंसा, श्लाघा, स्तुति *f.*, गुण-वर्णना-कीर्तनं. -able, *a.* श्लाघ्य, स्तुत्य, प्रशस्य, श्लाघार्ह, प्रशंसार्ह, स्तवनोचित; *See* **Praise,-worthy.** -ation, *s.* प्रशंसनं, श्लाघनं. -atory, *a.* प्रशंसागर्भ, प्रशंसक, स्तुतिरूप, प्रशंसा-श्लाघा-स्तुति-मय (यी *f.*), प्रशंसाकर (री *f.*). -er, *s.* प्रशंसकः, स्तावकः.

**Laugh,** *v. i.* हस् 1 P, प्र-वि°; स्मि 1 A (l. gently); 'l. violently' उच्चैः हस्, अट्टहासं कृ 8 U; 'l. at' अव-उप-हस्, उपहासास्पदं मन् 4 A, अव-मन्; 'l. in the sleeves' अंतर्-निभृतं-हस्. -*s.*, -ing, -Laughter, *s.* हासः, हसनं, हास्यं, हसितं, वि-प्र°; स्मितं; 'a horse-l.' अट्टहासः, उच्चैर्हासः, प्र-अति-हासः; 'an inward l.' अंतर्हासः -able, *a.* हासकर (री *f.*), हास्यास्पदं, हास्य. -er, *s.* हासकः, हासिन् *m.* -ing, *a.* हास्यमुख (खी *f.*), स्मेरमुख, हास्यवदन; 'l.-stock' उपहासास्पदं, हास्यपात्रं. -ingly, *adv.* सहासं, विहस्य, सस्मितं.

**Launch,** *v. t.* (नावं जले) क्षिप् 6 P, मुच् 6 P or c.; प्रविश् c.; वह् c.; 'l. thy hundred-shafted bolt' मुंच शतशोऽशनिं (M. 5). 2 सहसा विसृज् 6 P or प्रक्षिप्, प्राप् 4 U. -*v. i.* जलं प्रविश् 6 P. -*s.* नौमोचनं or जलप्रवेशनं.

**Laundress, Launder,** *s.* रजकभार्या, निर्णेजकी. -Launderer, *s.* रजकः, निर्णेजकः. **Laundry,** *s.* रजकगृहं, वस्त्रधावनशाला.